# ॥ वाल्मीकि रामायण॥

## ७ उत्तरकाण्ड

## अध्याय १२

राक्षसेन्द्रोऽभिषिक्तस्तु भ्रातृभ्यां सहितस्तदा ।
ततः प्रदानं राक्षस्या भगिन्याः समचिन्तयत् ॥१॥

ददौ तां कालकेयाय दानवेन्द्राय राक्षसीम् ।
स्वसां शूर्पणखां नाम विद्युज्जिह्वाय नामतः ॥२॥

अथ दत्त्वा स्वसारं स मृगयां पर्यटन्नृपः ।
तत्रापश्यत्ततो राम मयं नाम दितेः सुतम् ॥३॥

कन्यासहायं तं दृष्ट्वा दशग्रीवो निशाचरः ।
अपृच्छत्को भवनेको निर्मनुष्य मृगे वने ॥४॥

मयस्त्वथाब्रवीद्राम पृच्छन्तं तं निशाचरम् ।
श्रूयतां सर्वमाख्यास्ये यथावृत्तमिदं मम ॥५॥

हेमा नामाप्सरास्तात श्रुतपूर्वा यदि त्वया ।
दैवतैर्मम सा दत्ता पौलोमीव शतक्रतोः ॥६॥

तस्यां सक्तमनास्तात पञ्चवर्षशतान्यहम् ।
सा च दैवत कार्येण गता वर्षं चतुर्दशम् ॥७॥

तस्याः कृते च हेमायाः सर्वं हेमपुरं मया ।
वज्रवैदूर्यचित्रं च मायया निर्मितं तदा ॥८॥

तत्राहमरतिं विन्दंस्तया हीनः सुदुःखितः ।
तस्मात्पुराद्दुहितरं गृहीत्वा वनमागतः ॥९॥

इयं ममात्मजा राजंस्तस्याः कुक्षौ विवर्धिता ।
भर्तारमनया सार्धमस्याः प्राप्तोऽस्मि मार्गितुम् ॥१०॥

कन्यापितृत्वं दुःखं हि नराणां मानकाङ्क्षिणाम् ।
कन्या हि द्वे कुले नित्यं संशये स्थाप्य तिष्ठति ॥११॥

द्वौ सुतौ तु मम त्वस्यां भार्यायां सम्बभूवतुः ।
मायावी प्रथमस्तात दुन्दुभिस्तदनन्तरम् ॥१२॥

एतत्ते सर्वमाख्यातं याथातथ्येन पृच्छतः ।
त्वामिदानीं कथं तात जानीयां को भवानिति ॥१३॥

एवमुक्तो राक्षसेन्द्रो विनीतमिदमब्रवीत् ।
अहं पौलस्त्य तनयो दशग्रीवश्च नामतः ॥१४॥

ब्रह्मर्षेस्तं सुतं ज्ञात्वा मयो हर्षमुपागतः ।
दातुं दुहितरं तस्य रोचयामास तत्र वै ॥१५॥

प्रहसन्प्राह दैत्येन्द्रो राक्षसेन्द्रमिदं वचः ।
इयं ममात्मजा राजन्हेमयाप्सरसा धृता ।
कन्या मन्दोदरी नाम पत्न्यर्थं प्रतिगृह्यताम् ॥१६॥

बाढमित्येव तं राम दशग्रीवोऽभ्यभाषत ।
प्रज्वाल्य तत्र चैवाग्निमकरोत्पाणिसङ्ग्रहम् ॥१७॥

न हि तस्य मयो राम शापाभिज्ञस्तपोधनात् ।
विदित्वा तेन सा दत्ता तस्य पैतामहं कुलम् ॥१८॥

अमोघां तस्य शक्तिं च प्रददौ परमाद्भुताम् ।
परेण तपसा लब्धां जघ्निवाँल्लक्ष्मणं यया ॥१९॥

एवं स कृतदारो वै लङ्कायामीश्वरः प्रभुः ।
गत्वा तु नगरं भार्ये भ्रातृभ्यां समुदावहत् ॥२०॥

वैरोचनस्य दौहित्रीं वज्रज्वालेति नामतः ।
तां भार्यां कुम्भकर्णस्य रावणः समुदावहत् ॥२१॥

गन्धर्वराजस्य सुतां शैलूषस्य महात्मन ।
सरमा नाम धर्मज्ञो लेभे भार्यां विभीषणः ॥२२॥

तीरे तु सरसः सा वै सञ्जज्ञे मानसस्य च ।
मानसं च सरस्तात ववृधे जलदागमे ॥२३॥

मात्रा तु तस्याः कन्यायाः स्नेहनाक्रन्दितं वचः ।
सरो मा वर्धतेत्युक्तं ततः सा सरमाभवत् ॥२४॥

एवं ते कृतदारा वै रेमिरे तत्र राक्षसाः ।
स्वां स्वां भार्यामुपादाय गन्धर्वा इव नन्दने ॥२५॥

ततो मन्दोदरी पुत्रं मेघनादमसूयत ।
स एष इन्द्रजिन्नाम युष्माभिरभिधीयते ॥ २६॥

जातमात्रेण हि पुरा तेन राक्षससूनुना ।
रुदता सुमहान्मुक्तो नादो जलधरोपमः ॥ २७॥

जडीकृतायां लङ्कायां तेन नादेन तस्य वै ।
पिता तस्याकरोन्नाम मेघनाद इति स्वयम् ॥ २८॥

सोऽवर्धत तदा राम रावणान्तःपुरे शुभे ।
रक्ष्यमाणो वरस्त्रीभिश्छन्नः काष्ठैरिवानलः ॥ २९॥

---

The files in this directory are revised versions of the digital files produced by Professor Muneo Tokunaga, Kyoto University, and copyrighted by him. I am grateful to Professor Tokunaga for his agreement to this use of his original files and for permitting the revised versions to be made publicly available.
Dr J. D. Smith ; email: jds10@cam.ac.uk ; http://bombay.oriental.cam.ac.uk/index.html

---

ITRANS conversion questions to: Avinash Chopde ¡avinash@acm.org¿

---

Last updated on March 25, 1998; Send corrections to sanskrit@cheerful.com